अम्बुवाहिनी । काष्ठेन निर्म्मिता काष्ठस्य वा अम्बुवाहिनी ।) काष्ठादिकृतच्छिन्नायनौकाकृति जलसेचनी । सेंओत् इति भाषा । तत्पर्य्यायः । द्रोणी २ । इत्यमरः । १ । १० । ११ ॥

काष्ठीलः, पुं, (काष्ठिना इल्यते क्षिप्यते इति । काष्ठि + इल् क्षेपणे + कर्म्मणि घञ् ।) राजार्कः । इति राजनिर्घण्टः ॥

काष्ठीला, स्त्री, (कुत्सिता ईषद्वा अष्ठीलेव । कुत्सा- ष्ठीलेव इति वा ।) कदलीवृक्षः । इत्यमरः । २ । ४ । ११३ ॥

कास, ऋ ङ कुशब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट्-ऋदित् ।) कुशब्द इह रोगहेतुककुत्सितशब्दः । ऋ अचकासत् । ङ कासते वृद्धः । इति दुर्गादासः ॥

कासः, पुं, (कासतेऽनेन । कास शब्दकुत्सनयोः । "हलश्च" ३ । ३ । १२१ । इति घञ् ।) रोगविशेषः । कासी इति भाषा । तत्पर्य्यायः । क्षवथुः २ । इत्यमरः । २ । ६ । ५२ ॥ तस्य निदानं यथा,—

"धूमोपघाताद्रजसस्तथैव
व्यायामरूक्षान्ननिषेवणाच्च ।
विमार्गगत्वाच्च हि भोजनस्य
वेगावरोधात् क्षवथोस्तथैव" ॥

सम्प्राप्तिर्यथा । "प्राणो ह्युदानानुगतः प्रदुष्टः" ॥ लक्षणं यथा ।

"संभिन्नकांस्यस्वनतुल्यघोषः ।
निरेति वक्त्रात् सहसा सदोषो
मनीषिभिः कास इति प्रदिष्टः" ॥

स च पञ्चविधो यथा,—

"पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्" ।

तेषां पूर्व्वरूपं यथा,—

"पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते" ॥

वातिको यथा,—

"हृच्छङ्खमूर्द्धोदरपार्श्वशूली
क्षामाननः क्षीणबलस्वरौजाः ।
प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव" ॥

पैत्तिको यथा,—

"उरोविदाहज्वरवक्त्रशोषै-
रभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः ।
पित्तेन पीतानि वमेत् कटूनि
कासेत् सपाण्डुः परिदह्यमानः" ॥

श्लैष्मिको यथा,—

"प्रलिप्यमानेन मुखेन सीदन्
शिरोरुजार्त्तः कफपूर्णदेहः ।
अभक्तरुग्गौरवसादयुक्तः
कासेद्भृशं सान्द्रकफः कफेन" ॥

क्षतजो यथा,—

"अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः ।
रूक्षस्योरः क्षतं वायुर्गृहीत्वा कासमावहेत् ॥
स पूर्व्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् ।
कण्ठेन रुजतात्यर्थं विरुग्णेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीडाभितापिना ॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीड़ितः ।
पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्" ॥

क्षयजो यथा,—

"विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात् ।
घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः ।
कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम् ॥
सगात्रशूलज्वरदाहमोहान्
प्राणक्षयञ्चोपलभेत कासी ॥
शुष्यन् विनिष्ठीवति दुर्ब्बलस्तु
प्रक्षीणमांसो रुधिरं सपूयम् ।
तं सर्व्वलिङ्गं भृशदुश्चिकित्स्यं
चिकित्सितज्ञाः क्षयजं वदन्ति ॥
इत्येषः क्षयजः कासः क्षीणानां देहनाशनः ।
साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः ॥
नवौ कदाचित् सिध्येतामपि पादगुणान्वितौ ।
स्थविराणां जराकासः सर्व्वो याप्यः प्रकीर्त्तितः ।
त्रीन् पूर्व्वान् साधयेत् साध्यान् पथ्यैर्याप्यांस्तु यापयेत्" ॥ इति माधवकरः ॥ * ॥

("आशुकारी यतः कासस्तमेवातः प्रवक्ष्यति" ॥
अस्य प्राग्रूपसहितासंप्राप्ती रूपाणि च यथा ॥
"तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः ॥
शूकपूर्णाभकण्ठत्वं, तत्राधो विहतोऽनिलः ।
ऊर्द्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संसजन् ॥
शिरः स्रोतांसि संपूर्य्य ततोऽङ्गान्युत्क्षिपन्निव ।
क्षिपन्निवाक्षिणी पृष्ठमुरः पार्श्वे च पीड़यन् ॥
प्रवर्त्तते सवक्त्रेण भिन्नकांस्योपमध्वनिः ।
हेतुभेदात् प्रतीघातभेदो वायोः सरंहसः ॥
यद्रुजा शब्दवैषम्यं कासानां जायते ततः ।
कुपितो वातलैर्वातः शुष्कोरःकण्ठवक्त्रताम् ॥
हृत्पार्श्वोरःशिरःशूलं मोहक्षोभस्वरक्षयान् ।
करोति शुष्कं कासञ्च महावेगरुजास्वनम् ॥
सोऽङ्गहर्षी कफं शुष्कं कृच्छ्रान्मुक्त्वाल्पतां व्रजेत् ।
पित्तात् पीताक्षि कफता तिक्तास्यत्वं ज्वरोभ्रमः ॥
पित्तासृग्वमनं तृष्णा वैस्वर्यं धूमको मदः ।
प्रततं कासवेगेन ज्योतिषामिव दर्शनम् ॥
कफादुरोऽल्परुङ्मूर्द्धहृदयं स्तिमितं गुरु ।
कण्ठोपलेपः सदनं पीनसच्छर्द्दरोचकाः ॥
रोमहर्षोघनस्निग्धश्वेतश्लेष्मप्रवर्त्तनम् ।
युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ॥
उरस्यन्तःक्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ॥
पीतं श्यामञ्च शुष्कञ्च ग्रथितं कुथितं बहु ।
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमाद्वीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते ॥
क्षीणस्य सासृङ्मूत्रत्वं स्याच्च पृष्ठकटीग्रहः ।
वायुप्रधानाः कुपिता धातवो राजयक्ष्मिणः ॥
कुर्व्वन्ति यक्ष्मायतनैः कासं ष्ठीवेत् कफं ततः ।
पूतिपूयोपमं पीतं विस्रं हरितलोहितम् ॥
लुप्येते इव पार्श्वे च हृदयं पततीव च ।
अकस्मादुष्णशीतेच्छा बह्वाशित्वं बलक्षयः ॥
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दर्शननेत्रता ।
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च ॥
इत्येषः क्षयजः कासः क्षीणानां देहनाशनः ।
याप्यो वा बलिनां तद्वत् क्षतजोऽभिनवौ तु तौ ॥
सिध्येतामपि सानाथ्यात् साध्यादोषैः पृथक्त्रयः ।
मिश्रा याप्या द्वयात् सर्व्वे जरसा स्थविरस्य च ॥
कासाच्छ्वासक्षयच्छर्द्दि स्वरसादादयो गदाः ।
भवन्त्युपेक्षया यस्मात् तस्मात्तं त्वरया जयेत्" ॥
इति वाभटे निदानस्थाने । ३ अध्याये ॥ * ॥

अथ कासस्य चिकित्सा यथा ॥

"केवलानिलजं कासं स्नेहैरादावुपाचरेत् ।
वातघ्नसिद्धैः स्निग्धैश्च पेयायूषरसादिभिः ॥
लेहैर्धूमैस्तथाभ्यङ्गैः स्वेदसेकावगाहनैः ।
वस्तिभिर्बद्धविड्वातं सपित्तन्तूर्द्ध्वभक्तिकैः ।
घृतैः क्षीरैश्च सकफं जयेत् स्नेहविरेचनैः ।
गुड़ूचीकण्टकारीभ्यां पृथक्त्रिंशत्पलाद्रसे ॥
प्रस्थः सिद्धो घृताद्वातकासनुत् वह्निदीपनः ।
क्षाररास्नावचाहिङ्गुपाठायष्ट्याह्वधान्यकैः ॥
द्विशाणैः सर्पिषः प्रस्थं पञ्चकोलयुतैः पचेत् ॥
दशमूलस्य निर्य्यूहे पीतोमण्डानुपायिना ॥
सकासश्वासहृत्पार्श्वग्रहणीरोगगुल्मनुत् ।
द्रोणेऽपां साधयेद्रास्नां दशमूलशतावरीः ॥
पलोन्मितादिकुड़वं कुलत्थं वदरं यवम् ।
तुलार्द्धञ्चाजमांसस्य तेन साध्यं घृताढ़कम् ॥
समक्षीरं पलांशैश्च जीवनीयैः समीक्ष्य तत् ।
प्रयुक्तं वातरोगेषु पाननावनवस्तिभिः ॥
पञ्चकासान् शिरःकम्पं योनिवङ्क्षणवेदनाम् ।
सर्व्वाङ्गैकाङ्गरोगांश्च सप्लीहोर्द्ध्वानिलान्जयेत्" ॥ * ॥

"दुरालभां शृङ्गवेरं शठीं द्राक्षां सितोपलाम् ॥
लिह्यात् कर्कटशृङ्गीञ्च कासे तैलेन वातजे ।
दुस्पर्शां पिप्पलीं मुस्तां भार्गीं कर्कटकं शठीम् ॥
पुराणगुड़तैलाभ्यां चूर्णितामवलेहयेत् ।
तद्वत् सकृष्णां शुण्ठीञ्च सभार्गीं तद्वदेव च ॥
पिबेच्च कृष्णां कोष्णेन सलिलेन ससैन्धवाम् ।
मस्तुना ससितां शुण्ठीं दध्ना वा कणरेणुकाम् ॥
पिबेद्वदरमज्जो वा मदिरा दधिमस्तुभिः ।
अथवा पिप्पलीकल्कं घृतभृष्टं ससैन्धवम् ॥
कासीसपीनसो धूमं स्नैहिकं विधिना पिबेत्" ।

"यवानीपिप्पलीबिल्वमध्यनागरचित्रकैः ।
रास्नाजाजी पृथक्पर्णी पलाशशठीपौष्करैः ॥
सिद्धां स्निग्धाम्ललवणां पेयामनिलजे पिबेत् ।
कटिहृत् पार्श्वकोष्ठार्त्तिश्वासहिक्काप्रणाशनीं" ॥

"पित्तकासे तनुकफे त्रिवृतां मधुरैर्युताम् ।
युञ्ज्याद्विरेकाययुतां घनश्लेष्मणि तिक्तकैः ॥
हृतदोषो हिमं स्वादु स्निग्धं संसर्ज्जनं भजेत् ।
घने कफे तु शिशिरं रूक्षं तिक्तोपसंहितम् ॥
लेहः पित्ते सिता धात्री क्षौद्रद्राक्षा हिमोत्पलैः ।
सकफे साब्दमरिचः सघृतः सानिले हितः ॥